**Series JSR/1**

**Set 4**

कोड नं.
Code No. **52/1**

रोल नं.
Roll No.

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **16** हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा। 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे।
- Please check that this question paper contains **16** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

## सङ्कलनात्मकं मूल्याङ्कनम् - II

## SUMMATIVE ASSESSMENT-II

# संस्कृतम् (सम्प्रेषणाधारितम्)

# COMMUNICATIVE SANSKRIT

*अवधिः : होरात्रयम्]* *[ पूर्णाङ्काः : 90*

*निर्धारित समय : 3 घण्टे]* *[ अधिकतम अंक : 90*

*Time allowed : 3 hours]* *[ Maximum marks : 90*

[P.T.O.

| | | | |
|---|---|---|---|
| खण्डः क | : | अपठितांश-अवबोधनम् (अपठितांश-अवबोधन) | 15 अङ्काः |
| Section A | : | Unseen Reading Comprehension | |
| खण्डः ख | : | रचनात्मककार्यम् (रचनात्मक-कार्य) | 15 अङ्काः |
| Section B | : | Writing Skills | |
| खण्डः ग | : | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | 30 अङ्काः |
| Section C | : | Applied Grammar | |
| खण्डः घ | : | पठित-अवबोधनम् (पठित-अवबोधन) | 30 अङ्काः |
| Section D | : | Reading Comprehension | |

***निर्देशाः***

***Instructions :***

*(i)* *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।*
*इस प्रश्न-पत्र में चार खण्ड हैं।*
*The question paper has four sections.*

*(ii)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*
*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे।*
*The answers to each section must be written at one place.*

*(iii)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*
*प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी।*
*Write the question number according to the question paper.*

*(iv)* *सर्वेषां प्रश्नानाम् उत्तराणि* ***संस्कृतेन*** *लेखनीयानि।*
*सभी प्रश्नों के उत्तर* ***संस्कृत*** *में लिखिए।*
*Answer all the questions in* ***Sanskrit.***

## खण्डः 'क' (Section A)

## अपठितांश–अवबोधनम् (अपठितांश–अवबोधन)

**Unseen Reading Comprehension** **15 अङ्काः**

**1.** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित अनुच्छेद को पढ़कर दिए गए प्रश्नों के संस्कृत में उत्तर दीजिए :

Read the following passage and answer the given questions in Sanskrit :

यदि मनः प्रसन्नम् अस्ति तर्हि वयं सर्वाणि कार्याणि सम्यक् कर्तुं शक्नुमः। मनः खिन्नम् असन्तुष्टं वा अस्ति चेत् अस्माकं प्रेरणा न भवति। अतः मनसः प्रसन्नतारक्षणम् अत्यन्तम् आवश्यकम्। जयपराजययोः आरम्भः अपि जनानां मनसि भवति। स्नेहस्य शत्रुताया आरम्भः अपि तेषां मनसि एव भवति। जनैः सर्वदा भावात्मकचिन्तनं करणीयम्। अभावात्मकचिन्तनकर्ता जीवने सर्वत्र सदैव कष्टानि एव अनुभवति। अत एव उक्तम् – ''मन एव मनुष्याणां कारणं बन्धमोक्षयोः''।

**प्रश्नाः**

I. एकपदेन उत्तरत। 1×2=2

एक शब्द में उत्तर दीजिए।

Answer in one word.

(i) बन्धमोक्षयोः कारणं किम् अस्ति ?

(ii) कस्य प्रसन्नतारक्षणम् आवश्यकम् अस्ति ?

II. पूर्णवाक्येन उत्तरत। 2×2=4

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

(i) कः जीवने सर्वत्र कष्टानि अनुभवति ?

(ii) कदा वयं सर्वाणि कार्याणि सम्यक् कर्तुं शक्नुमः?

III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत ः ½×4=2

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए ः

Choose and write the appropriate answer from the given options :

(क) 'शक्नुमः' इति क्रियापदस्य किं कर्तृपदं गद्यांशे प्रयुक्तम् ?

| | |
|---|---|
| (i) कर्ता | (ii) मनः |
| (iii) वयम् | (iv) कार्याणि । |

(ख) 'अथवा' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

| | |
|---|---|
| (i) अपि | (ii) वा |
| (iii) तर्हि | (iv) एव । |

(ग) 'आरम्भ:' इतिपदस्य किं क्रियापदम् अनुच्छेदे प्रयुक्तम् ?

| | |
|---|---|
| (i) शक्नुमः | (ii) करणीयम् |
| (iii) मनसि | (iv) भवति । |

(घ) गद्यांशे 'तेषाम्' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?

| | |
|---|---|
| (i) कष्टेभ्यः | (ii) कार्येभ्यः |
| (iii) जनेभ्यः | (iv) जीवनेभ्यः । |

IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत। 2

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए।

Write the appropriate title for this passage in Sanskrit.

**2.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित श्लोक को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following shloka and answer the given questions in Sanskrit :

विद्या ददाति विनयं विनयाद् याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद् धर्मं ततः सुखम् ।।

**प्रश्ना :**

I. एकपदेन उत्तरत। 1×1=1

एक शब्द में उत्तर दीजिए।

Answer in one word.

(i) पात्रभूतः जनः किं प्राप्नोति ?

II. पूर्णवाक्येन उत्तरत। 1×2=2

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

(i) विद्या किं ददाति ?

(ii) सर्वसुखसाधनं किम् अस्ति ?

III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत : 1×2=2

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए :

Choose and write the appropriate answer from the given options :

(क) श्लोके 'वित्तम्' इत्यस्य किं पर्यायपदं प्रयुक्तम्?

(i) विनयम्

(ii) धनम्

(iii) सुखम्

(iv) विनयात्।

(ख) 'ददाति' इति क्रियापदस्य किं कर्तृपदं श्लोके प्रयुक्तम् ?

(i) सुखम्

(ii) पात्रताम्

(iii) विद्या

(iv) धनम्।

## खण्ड: 'ख' (Section B)

## रचनात्मककार्यम् (रचनात्मक –कार्य)

## Writing Skills 15 अङ्का:

**3.** मित्रं प्रति अधोलिखितम् पत्रं मञ्जूषापदसहायतया पूरयित्वा पुन: लिखत : ½×10=5

मित्र को लिखे गए निम्नलिखित पत्र को मञ्जूषा में दिए गए शब्दों की सहायता से पूर्ण कर पुन: लिखिए :

Complete the following letter written to your friend, with the help of the words given in the box and rewrite the same :

(i) ------------------------ ।

प्रियमित्र (ii) ------------------------ !

अत्र सर्वं कुशलम्। भवान् अपि तत्र कुशली इति मन्ये। गतसप्ताहे (iii) --------------- । विद्यालये संस्कृतसम्भाषण-शिविरम् आयोजितम् (iv) ---------------------------- । दशदिनानि वयं (v) ------------------------ सम्भाषणस्य अभ्यासम् अकुर्म। तत्र एकस्याः लघुनाटिकायाः (vi) -------------------- अभवत्। अहं तु विदूषकस्य (vii) ------------------ कृतवान्। अहम् इदानीं सर्वदा संस्कृतेन एव (viii) -------------------- । मम शिक्षकाः अपि मयि स्निह्यन्ति। भवान् अपि संस्कृतेन (ix) ---------------- प्रयत्नं करोतु। पितरौ (x) ---------------- मम प्रणामाञ्जलिं निवेदयतु।

भवतः मित्रम्,

प्रणवः।


**मञ्जूषा**

| |
|---|
| सम्भाषणस्य, अस्माकम्, वदामि, प्रति, हैदराबादतः, अभिनयम्, सौरभ!, मञ्चनम्, आसीत्, संस्कृतेन। |

**4.** अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत : 2×5=10

नीचे दिए गए चित्र का वर्णन मञ्जूषा में दिए गए शब्दों की सहायता से **पाँच** संस्कृत वाक्यों में कीजिए :

Describe the following picture in **five** Sanskrit sentences with the help of the words given in the box below :



**मञ्जूषा**

| |
|---|
| वने, धावति, सिंहः, कूर्दन्ति, पुष्पाणि, गजः, वृक्षाः, उष्ट्रः, मृगाः, च, भल्लूकाः, वृक्षेषु, पक्षिणः। |

**अथवा (OR)**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितम् विषयम् अधिकृत्य **पञ्चसु** संस्कृतवाक्येषु एकम् अनुच्छेदं लिखत :

मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय पर **पाँच** संस्कृत वाक्यों में एक अनुच्छेद लिखिए :

Write a paragraph in **five** Sanskrit sentences on the following topic with the help of the words given in the box below :

"अतिवृष्ट्या हानिः"

**मञ्जूषा**

| |
|---|
| नद्यः, जलौघः, वृक्षाः, कूलानि, नष्टानि, सर्वत्र, सस्यानि, जलम्, निमग्नाः, सेनासाहाय्येन, रोगाः, जायन्ते, पशवः, जनाः। |

## खण्डः 'ग' (Section C)

## अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)

**Applied Grammar** **30 अङ्काः**

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत : 1×4=4

निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि अथवा सन्धिविच्छेद करके लिखिए :

Write the underlined words of the following sentences after joining or disjoining Sandhis :

(i) प्रत्येकम् अयनस्य अवधिः षण्मासाः।

(ii) हरिम् + वन्दे।

(iii) पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यमेव हि।

(iv) भवत् + मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत : 1×5=5

निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनकर लिखिए :

Choose and write the correct compounded or expounded forms of the underlined words in the following sentences :

(क) 'पिककाकौ उड्डीयेते।'

(i) पिकाः च काकाः च (ii) पिकः च काकः च

(iii) पिकः च काकः तयोः समाहारः (iv) काकाः पिकः च।

(ख) 'विमूढा धीः यस्य सः पक्वं फलं त्यक्त्वा अपक्वं खादति।'

(i) विमूढधीः (ii) विमूढाधीः

(iii) विमूढीधीः (iv) धीविमूढा।

(ग) 'अयं वानरः यथेच्छं फलानि खादति।'

(i) इच्छया सहितम् (ii) इच्छाम् अनतिक्रम्य

(iii) इच्छाभिः अनतिक्रम्य (iv) इच्छायाः पश्चात्।

(घ) 'वने पशवः पक्षिणः च निवसन्ति।'

(i) पशुपक्षी (ii) पशवः पक्षिणः

(iii) पशुपक्षिणः (iv) पक्षिपशुः।

(ङ) 'पीतदुग्धः बालः विद्यालयं गच्छति।'

(i) पीतं दुग्धं यया सा
(ii) पीतं दुग्धं यस्मै सः
(iii) दुग्धं पीतं यस्मिन् सः
(iv) पीतं दुग्धं येन सः।

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत : 1×5=5

निम्नलिखित वाक्यों में रेखाङ्कित पदों के प्रकृतिप्रत्ययों को जोड़कर या पृथक् करके उचित उत्तर विकल्पों में से चुनकर लिखिए :

Write the underlined words of the following sentences after joining or disjoining suffixes to the roots or words, selecting the correct answer from the options given below :

(क) 'त्रैलोक्यं दह् + शतृ इव प्रचण्डज्वालः अग्निः।'

(i) दहन्
(ii) दहन्तम्
(iii) दहतः।

(ख) 'सेवमाना बालिका राधा अस्ति।'

(i) सेव् + मान
(ii) सेव् + शानच्
(iii) सेवमान + तल्।

(ग) 'एषा मम पुत्र + ङीप् विद्यालयं गच्छति।'

(i) पुत्रः
(ii) पुत्रणी
(iii) पुत्री।

(घ) 'परिश्रमस्य महत्त्वं को न जानाति ?'

(i) महत् + त्व
(ii) मह + त्वम्
(iii) मह + त्व।

(ङ) 'दुष्टानां मूर्ख + तल् दृष्ट्वा सर्वे उपहसन्ति।'

(i) मूर्खत्व
(ii) मूर्खताम्
(iii) मूर्खाम्।

**8.** अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः पूरयित्वा लिखत : 1×5=5

निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए उचित अव्यय पदों के द्वारा कीजिए :

Fill in the blanks in the following sentences with appropriate indeclinable words given in the box :

(i) सः ______ वाराणसीं गमिष्यति ।

(ii) ग्रामात् ______ एका नदी प्रवहति ।

(iii) त्वं स्वनगरं ______ अगच्छः ?

(iv) ______ अहं पुस्तकं पठामि ।

(v) सः जनः ______ इतस्ततः भ्रमति ?

**मञ्जूषा**

| |
|---|
| सम्प्रति, श्वः, किमर्थम्, कदा, बहिः । |

**9.** उचितसंख्यापदं चित्वा वाक्यानि पूरयत । 1×5=5

उचित संख्या पद चुनकर वाक्य पूर्ण कीजिए।

Choose the correct numerical words and complete the sentences.

(i) उद्याने आम्रस्य ______ वृक्षाः सन्ति । (त्रीणि, त्रयः, तिस्रः)

(ii) ______ चन्द्रः तमः हन्ति । (एकम्, एका, एकः)

(iii) जनाः ______ नेत्राभ्यां पश्यन्ति । (द्वयोः, द्वाभ्याम्, द्वौ)

(iv) ______ स्त्रियः जलम् आनेतुं गच्छन्ति । (चतस्रः, चत्वारः, चत्वारि)

(v) ______ बालिके पठतः । (द्वौ, द्वि, द्वे)

**10.** अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धमस्ति । प्रदत्त विकल्पेभ्यः उचितम् उत्तरं चित्वा अशुद्धपदं संशोध्य लिखतः 1×6=6

निम्नलिखित वाक्यों में रेखांकित पद अशुद्ध है । दिए गए विकल्पों में से उचित उत्तर चुनकर अशुद्ध पद को संशोधित कर लिखिए :

Choose the correct answer from the given options and correct the underlined incorrect words in the following sentences :

(क) नद्यां <u>जलः</u> नास्ति।

(i) जले (ii) जलस्य

(iii) जलम् (iv) जलाय।

(ख) श्यामः तव <u>मित्रः</u> अस्ति।

(i) मित्रान् (ii) मित्रेण

(iii) मित्रस्य (iv) मित्रम्।

(ग) अहं गीतां <u>पठिष्यामः</u>।

(i) पठिष्यामि (ii) पठिष्यति

(iii) पठिष्यावः (iv) पठिष्यथ।

(घ) ते अत्र भोजनम् <u>अकुर्वः</u>।

(i) अकरोत् (ii) अकरोः

(iii) अकुर्वन् (iv) अकुरुताम्।

(ङ) द्वौ वानरौ <u>मनुष्यस्य</u> सह गच्छतः।

(i) मनुष्यम् (ii) मनुष्येण

(iii) मनुष्यान् (iv) मनुष्यात्।

(च) गायिकाः गीतानि <u>गायति</u>।

(i) गास्यामि (ii) गायसि

(iii) अगायत् (iv) गायन्ति।

## खण्डः घ (Section D)

## पठित–अवबोधनम् (पठित–अवबोधन)

## Reading Comprehension **30 अङ्काः**

**11.** अधोलिखितं गद्यांशं, पद्यं नाट्यांशं च पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत :

निम्नलिखित गद्यांश, पद्य और नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following prose, poetry and drama passage and answer the given questions in Sanskrit :

**(अ) गद्यांशः**

''कालोऽहम्। अहं खलु कालः। विश्वस्य आत्माऽहम्। कलयामि गणयामि जगतः आयुः प्रमाणम्। सततं चक्रवत् परिवर्तमानः भूतं वर्तमानं भविष्यदपि च वीक्षमाणः अहमेव साक्षी जगतः उत्पत्तेः विकासस्य प्रलयस्य च। इदं जगत् पुनः पुनः जायते विलीयते च परमहं सर्वदा विद्यमानोऽस्य सर्वं क्रियाकलापं पश्यामि।''

**प्रश्नाः**

I. एकपदेन उत्तरत। 1

एक शब्द में उत्तर दीजिए।

Answer in one word.

पुनः पुनः किं जायते ?

II. पूर्णवाक्येन उत्तरत। 1

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

कालः किं गणयति ?

III. विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत : 1×2=2

विकल्पों में से उचित उत्तर चुनकर लिखिए :

Choose and write the correct answer from the given options :

(क) 'सर्वदा विद्यमानोऽस्य' अत्र 'अस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(i) कालाय (ii) जगते

(iii) वर्तमानाय (iv) विकासाय।

(ख) 'संसारस्य' इतिपदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(i) वर्तमानस्य (ii) विकासस्य

(iii) प्रलयस्य (iv) जगतः।

**(आ) पद्यम्**

''आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।

तस्माद् रक्षेत्सदाचारं प्राणेभ्योऽपि विशेषतः।।''

**प्रश्नाः**

I. एकपदेन उत्तरत। 1

एक शब्द में उत्तर दीजिए।

Answer in one word.

अस्माकं व्यवहारः सम्यग् भवेत् इति केषां वचनम् अस्ति ?

II. पूर्णवाक्येन उत्तरत। 1

पूर्णवाक्य में उत्तर दीजिए।

Answer in a complete sentence.

प्राणेभ्योऽपि विशेषतः कः रक्षणीयः ?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखतः 1×2=2

विकल्पों में से उचित उत्तर चुनकर लिखिए :

Choose and write correct answer from the given options.

(क) 'अतः' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

(i) अपि (ii) इति

(iii) एतत् (iv) तस्मात्।

(ख) 'प्रथमः' इति विशेषणपदस्य विशेष्यपदं किम् ?

(i) वचः (ii) विशेषतः

(iii) आचारः (iv) धर्मः।

**(इ) नाट्यांशः**

''राजहंसः – अये किन्तु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः काकाशब्दैः वातावरणम् आकुलीक्रियते।''

राजहंसी – भर्तः! काकात् अन्यः को भवितुमर्हति ? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम्। मेध्यम् अमेध्यं सर्वमेव भक्षयति कर्णकटुशब्दैः ......।

काकः – (प्रविश्य सक्रोधम्।) आः किम् उक्तवती भवती? यदि अहं कृष्णवर्णः, तर्हि श्रीरामस्य वर्णः कीदृशः? श्रीवासुदेवस्य वर्णः कीदृशः? मुग्धे! अहं तु अतीवकर्तव्यपरायणः। प्रभाते 'का का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि।''

**प्रश्नाः**

I. एकपदेन उत्तरत। 1

एक शब्द में उत्तर दीजिए।

Answer in one word.

सरस्तीरे कः विहरति स्म ?

II. पूर्णवाक्येन उत्तरत। 1

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

काकः स्ववर्णस्य तुलनां केन केन सह करोति ?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत: 1×2=2

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए :

Choose and write the correct answer from the given options :

(क) 'अहं तु अतीवकर्तव्यपरायणः' अत्र 'अहम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(i) राजहंसाय (ii) काकाय

(iii) श्रीरामाय (iv) वासुदेवाय।

(ख) 'भक्षयति' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

(i) राजहंसी (ii) राजहंसः

(iii) काकः (iv) अहम्।

**12.** अधोलिखित**कथनयोः** समुचितं भावं विकल्पेभ्यः चित्वा लिखतः 1×2=2

निम्नलिखित **दोनों** कथनों का उपयुक्त भाव विकल्पों में से चुनकर लिखिए :

Choose and write the correct gist of the following **two** sentences from the given options :

(क) 'सततं चक्रवत् परिवर्तमानः कालः।'

(i) संसारे भ्रमन् कालः चक्रम् एव अस्ति।

(ii) कालः चक्रम् इव निरन्तरं गतिशीलः अस्ति।

(iii) कालः चक्रेण सह गच्छति।

(ख) 'आपदां तरणिः धैर्यम्।'

(i) धैर्येण आपदः नौकाः इव भवन्ति।

(ii) विपत्तौ नरः नदीं तीर्त्वा एव धैर्यम् आप्नोति।

(iii) यथा नौकासाहाय्येन जनाः पारं गच्छन्ति एवं धैर्यबलेन जनाः आपद्भ्यः तरन्ति।

**13.** मञ्जूषातः समुचितं पदं चित्वा अधोलिखितश्लोक**द्वयस्य** अन्वयं पूरयतः 1×4=4

मञ्जूषा में से समुचित पद चुनकर निम्नलिखित **दोनों** श्लोकों के अन्वय को पूर्ण कीजिए :

Complete the prose order of the following **two** shlokas by choosing the appropriate words given in the box :

I. ''त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः।।''

**अन्वयः** – यः __________ वाचं त्यक्त्वा परुषां (वाचं) अभ्युदीरयेत्। (सः) __________ पक्वं फलं परित्यज्य अपक्वं फलं भुङ्क्ते।

II. ''परमापद्गतेनापि नैव तात! त्वया रणे।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः।।''

**अन्वयः** – परम + आपद्गतेन अपि त्वया __________ इदम् अस्त्रं विशेषतः __________ न एव प्रयोक्तव्यम्।

**मञ्जूषा**

| |
|---|
| मानुषेषु, विमूढधीः, रणे, धर्मप्रदाम्। |

**14.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। 1×5=5

रेखांकित पदों के आधार पर प्रश्न निर्माण कीजिए।

Frame the questions on the basis of the underlined words :

(i) कृषकस्य क्षेत्रे <u>श्रमं</u> कृत्वा सः धनम् अर्जितवान्।

(ii) <u>अरुणाचलस्य</u> राजधानी ईटानगरम् अस्ति।

(iii) संवत्सरे द्वादश मासाः भवन्ति।

(iv) द्रौणिना द्रौपद्याः पुत्राः हताः।

(v) धैर्यवान् लोके परिभवं न प्राप्नोति।

**15.** अधोलिखितवाक्यानि घटनाक्रमानुसारेण लिखत : ½×8=4

निम्नलिखित वाक्यों को घटनाक्रम के अनुसार लिखिए :

Write the following sentences in their sequential order.

(i) 'पक्षिणां राजा कः भवेत्' इति विचिन्त्य तत्र विवादः भवति।

(ii) मातुः आज्ञया ते मिलित्वा निवसन्ति आनन्देन च नृत्यन्ति।

(iii) तयोः मध्ये विवादः भवति।

(iv) सर्वे स्वप्रशंसां कुर्वन्ति।

(v) सः काकं कटुवचनानि कथयति।

(vi) तदैव अन्ये अनेके पक्षिणः अपि तत्र प्रविशन्ति।

(vii) एकदा राजहंसः काकस्य ध्वनिं श्रुत्वा कुपितः भवति।

(viii) काकः अपि कुपितः भवति।

**16.** रेखाङ्कितपदानां प्रसङ्गानुसारम् अर्थं चित्वा लिखत। 1×3=3

रेखांकित पदों के प्रसंगानुसार अर्थ चुनकर लिखिए।

Choose and write the contextual meanings of the underlined words.

(क) 'अये ! कथम् इमं सङ्कल्पं श्रुत्वा विस्मिताः यूयम् ।'

(i) कल्पनाम्

(ii) धार्मिकानुष्ठानस्य प्रतिज्ञाम्

(iii) सुन्दरं वचनम्।

(ख) 'दुष्टबुद्धिः भित्तौ सन्धिं प्रकल्प्य कलशम् अक्षिपत्।'

(i) रचयित्वा

(ii) कल्पनां कृत्वा

(iii) विकल्पं चित्वा।

(ग) 'द्रोणपुत्रः सव्येन पाणिना चक्रं गृहीतवान्।'

(i) जलेन

(ii) पणेन

(iii) हस्तेन।